जनसहस्रमानेन चतुरशीतिसहस्रमानेन च बहिर्दृश्यते एवं लक्षयोजनोन्नाहः एवमुत्तरोत्तरे
णेलावृतं नीलः श्वेतः शृंगवानिति त्रयो मर्यादागिरयः प्रागायताः पूर्वतो दीर्घाः क्षारोदएवा।
वधयो येषां द्विसहस्रयोजनविस्तीर्णाः दशांशादधिकोंऽशो येन तेन दैर्घ्य एव ह्रसंति न तु
सत्वेपुत्वेवायथोक्तं विस्तुरात्तो लक्षप्रमाणो द्वीपमध्ये दशहीनास्तथापरेऽपि एतच्च स्थू
लदृष्ट्योक्तं तयोरपि यथावन्मध्यमत्वाभावेन लक्षप्रमाणत्वाभावात् ८ ॥

भा॰ पं॰ ५५

अयुतयोजनमुत्सेधः उच्छ्रायो येषां अयं चोत्सेधः नीलादीनां अपि द्रष्टव्यः नीलादिषट्सु नं च तेषामपि
द्रष्टव्यं यथासंख्यं मर्यादागिरयः इति शेषः ९ आनीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषध
पर्यन्तं च दीर्घौ पश्चिमायतौ विस्तीर्णौ भवतः दिक्षु विदिक्षु भवतः ९० तावेव केतुमालभद्राश्वयोर्वर्षयोः
सीमाने विज्ञातौ तेन गदितौ ननु एवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्यतः पूर्वापरतो गिरि
द्वयं वर्षद्वयं वर्तते किं विद्वन् दक्षिणोत्तररेखायां तथैवेलावृतवेष्टितो मध्ये मेरुरभ्यन्तः त्रीणि त्री
णि वर्षाणि गिरयश्चेत्याह सर्वे नीलनवप्रमाणे जम्बूद्वीपमध्ये स्थितो मेरोः षोडशसहस्राणि सर्वतः
एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायताः यथा नीलादयः अयुतयोज
नोत्सेधा हरिवर्षं किंपुरुषं भारतं तानि यथासंख्यं ९ तथैवेलावृतमपरेण पूर्वेण माल्यवद्गन्ध
मादनौ आनीलनिषधायतौ द्विसहस्रं प्रस्थितौ ९० केतुमालभद्राश्वयोः सीमानं विज्ञातौ
तौ ९१ मन्दरो मेरुमन्दरः सुपार्श्वः कुमुदः इति अयुतयोजनविस्तारोच्छ्रायाः मेरोश्चतुर्दिक्षु अवष्ट
म्भगिरयः उक्ताः ९२ चतुर्षु तेषु चूतजम्बूकदम्बन्यग्रोधाः चत्वारः पादपप्रवराः पर्वतकेत
नव अपि सहस्रोच्छ्रायाः तावद्विटपविततयः शतयोजनपरिणाहाः ९३ स्थितं तावत् इलावृ
तस्यापि अष्टादशभेदेषां बहूनां च ततः पंचशतगिरीणां बहूनां द्वादश एवं दक्षिणोत्तररेखायाम
पि नावलनवप्रमाणं पूर्वापररेखायामपि समेरोरिलावृतस्यापि चतुस्त्रिंशत् गिर्योः चत्वारि शोभानि
द्विषष्टिसहस्राणि पूर्वापरवर्षयोरासमुद्रं दैर्घ्यं द्रष्टव्यमिति अनेन न विरोधः अयुतयोजनप्रमाणैः
विस्तारोच्छ्रायैर्येषां विस्तीर्णम् अष्टौ मेरोः एवं भूमनाम पूर्वे पश्चिमो गिरिः दक्षिणेन विस्तारो द
क्षिणेनैव च पूर्वापरविस्तारो द्रष्टव्यः सर्वतो दशयोजनसहस्रविस्तारो पूर्वेणेलावृतं तु पश्चाद्

१

८ वन्तीत्यादिविशेषः स्मृतः ॥ २८ ॥ अधिकं शतसहस्रैकत्वात् ...
४ ...

यत्रोपस्पर्शिनः यत्सेविनः १४ ललामो मणिकोत्पललनानां मण्डनं मतः श्रेष्ठायाः स्त्रियः तासां प्र-
सूयन्ते सहस्रं मध्येषु विहरंति १५ एकादशशतयोजनमन्तु गोयो देवचूतस्तस्य शिरसः सर्व-
णात् फलप्रमाणमुक्तं वायुपुराणे अरत्नीनां शतान्येकोनषष्ठाधिकानि च फलप्रमाणमा-
ख्यातं महर्षिभिः तन्दर्शिभिरिति १६ अतिमधुरस्वादो येतः सुरभिसुगन्धिभिर्नानावर्णैः पयि-
हृदाभ्रनाः पयोमज्जितः समस्तजलावृतोपस्पर्शिनः उपदेवगणयोगो स्पर्ययोगि स्त्राभावि-
कानि सत्तनं संभधारयन्ति १४ देवो ग्रामानानि च भान्ति च नारिनेदनं चैत्ररथं वैभ्राजकं सर्वतो-
भद्रमिति १५ ये प्रमरपरिवृतहस्तहस्तललनाललामयूथयत उपदेवगणो रूपवीयमा-
नमहिमानः किल विहरन्ति १६ मंदरोत्संगएकादशशतयोजनोत्तुंगदेवचूतशिरसो गिरि-
शिखरस्थूलानि फलान्यमृतकल्पानि पतंति १७ तेषां विशीर्यमाणानामतिमधुरस्वा-
भिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती पूर्वेणेला-
वृतमुपप्लावयति १८ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्श-
सुगन्धवातो दशयोजनं समंतादनुवासयति १९ एवं जम्बूफलानामत्युच्चनिपातविशीर्णा-
नामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनाम नदी मेरुमंदरशिखरादक्षिणाधिकपो-
वासिनः बहुलमाहरणाप्ररसः सएव उदमदकं तेन १८ यदुपजोषणात्प्रसादरसस्य सेवनात् १९
अनस्थिप्रायाणां अतिसरसबीजानां यत्र निपतन्ति तत्र आरभ्यात्मनो दक्षिणतः सर्वं मिलावृ-
तं प्लावयन् वहतीत्यर्थः २० ॥

तावन्सर्वतः शेषसोऽन्तरयोः २१ २२ आयामो यद्यामः सञ्चयामो वाहौः सकरयोस्तिर्यगंतरमिश्रकल
भा० तणः पंचव्यामसपरिणाहः स्थौल्यं यामस्मित्यर्थः केचित्तु पंचव्याममपरिणाहस्त्वेवपठंति २३ २४ नी
पं० वीनाश्रयो महत्वाः २५ चत्वत्वमेरुमूलायोजनसहस्रेत्यत्ताग्रेः परितः परिपयस्वजठरदेवकूटादयः
५५ तावत्कुभयोरपि रोधसोर्यामृत्तिका रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोका
भरणं जांबूनदनाम सुवर्णं भवति २१ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटि
टिसूत्राद्याभरणरूपेण खलु धारयंति २२ यस्तु महाकदंबः सुपार्श्वनिरूढस्तस्य कोटरेभ्यो।
विनिःसृताः पंचायामपरिणाहाः पंचमधुधाराः सुपार्श्वशिखरात्पतंत्यो परेणात्मानमि
लावृतमनुमोदयंति २३ यास्तुपयुंजानानां मुखनिर्वासितो वायुः समंतात्शतयोजनमनु
वासयति २४ एवंकुमुदनिरूढो यः शतवल्शो नाम वटः तस्य स्कंधेभ्यो नीचीनाः पयोद।
धिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणादयः सर्व एव कामदुघानदाः कुमुदाग्रात्पतंत
स्तमुत्तरेणेलावृतमुपयोजयंति २५ यानुपजुषाणानां न कदाचिदपि प्रजा
नां वलिपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा
भवंति यावज्जीवं सुखं निरतिशयमेव २६ कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरु
चकनिषधशिनीवासकपिलशंखवैदूर्यजारुधिहंसऋषभनागकालंजरनारदादयो विंश
तिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः २७ जठरदेवकूटौ मेरुं
पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुंगौ भवतः एवमपरेण पवनपा
तिष्ठंति अंतोष्टादशयोजनसहस्रप्रमाणान्यत्रौ जंवेसवादिद्युमणो बुपरिणामादियस्तनः अन्य
थावर्तिनेनजुकल्पभेदाद्यपेत्याहि सहस्रं पृथुत्वं चनोच २८ ॥ ५५

यथादिशं शाखादि विलयथारूपं इत्यादि वर्णनातिक्रमेण तृतीयमार्गेण नामार्हद्दिशि सहस्रप्रमाणेन नामा
नि पुराणि नगराणि तान्यानि यथाक्रमं मेरोर्नवपुराणि सुमेनोवत्यमरावती तेजोवती संयमनी तथा कृ
ष्णांगना पश्चिमा श्रद्धावती तथा चान्या महोदया यशोवती च ब्रह्मेंद्र प्रादीनां यथाक्रममिति ३०
इति श्रीभागवतभावार्थदीपिकायां पंचमे षोडशः १६॥ ततः सप्तदशे गंगा नानादिक्षु प्रवर्तते इलावृते चरुद्रे
ण संकर्षणनिषेवणं यज्ञलिंगस्य बलेर्यज्ञे लिंगं त्रिविक्रमस्य तिर्यग्विक्रमतः दक्षिणेन पदा

मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शात
कौंभीं वदंति २९ तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पु
रोष्टावुपक्लृप्ताः ३० इति श्रीभागवते पंचमस्कंधे भुवनकोशवर्णनं नाम षोडशोध्यायः १६॥
शुक उवाच॥ तत्र भगवतः साक्षाद्यज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगुष्ठनखनिर्भिन्नो
र्ध्वांडकटाहविवरेणांतः प्रविष्टा या बाह्यजलधारा तच्चरणपंकजावनेजनारुणकिंजल्को
परंजिताखिलजगदघमलापहोपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधी
यमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार १

भुवं क्रोशतां वामपदस्य त्रिपतः वामपादांगुष्ठनखेन निर्भिन्नम् ऊर्ध्वमुपरिभागो यस्यांडकटाहस्य तस्य
विवरेणांतः प्रविष्टा या बाह्यजलधारा सा दिवो मूर्धन्यवततारेत्यन्वयः तस्य यच्चरणपंकजं तस्या
वनेजनेन क्षालनेनारुणानि ताम्राणि किंजल्काः तैरुपरंजिता अखिलस्य जगतो
यमलापहमुपस्पर्शनं यस्याः तथा च अमला तत्र अमलत्वे साक्षाद्भगवत्पदीति नियतं नूपलक्षि
तेजाह्नवी भागीरथीत्यनुपलक्षणानि अन्नरहितेन वचो नाम तेनाभिधीयमाना तस्मिन् समये मा

८

कोसौ द्विजो मूर्धानमारुरोहेति किं तद्धि स्वपदं नद्याहुः यद्वैतिवीरव्रतः हठसंकल्पः अस्मत्कुल
देवताया हरेश्चरणारविंदोदकमिति हेतोः परमादरेणाधो विभर्तीत्यन्वयः कथंभूतः सन्प्रतिक्ष
णावर्धमानेन भगवद्भक्तियोगेन हठमत्यंतं क्लिद्यमानमंतर्हृदयं यस्य अतएवौत्कंठ्येन विवश
मामीलितं यत् लोचनयुगलं तत् देवकुशलेनाभ्यां विगलितममलं वाष्पं तेन सकलगात्रसहस्रमभि।
व्यज्यमानो रोमपुलकानां कुलं यस्य २ ततः सप्तर्षयः तस्या गंगायाः प्रभावाभिज्ञाः संतः याजयं।

५ यत्तद्विष्णुपदमाहुः यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोस्मत्कुलदेवताचरणा
रविंदोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानांतर्हृदय
औत्कंठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलवाष्पकलयाभिव्यज्य।
मानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा बिभर्ति २ ततः सप्तऋषयः तत्प्र
भावाभिज्ञा यां ननु तपस आत्यंतिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेनुपरत
भक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानम।
द्यापि जटाजूटैरुद्वहंति ३ ततोनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतर

जूटैरुद्वहंतीत्यन्वयः एतावत्येव नत्वधिकास्तीत्यभिप्रायवंतः तत्र हेतुः भगवति सततं भक्ति
योगलाभेनैवोपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैः कामिव कः इव यथा यंति प्रत्यक्षमुक्तिमि
व तामागतां मुमुक्षवो जना इवेति ३ ततोनेकसहस्रकोटीनां विमानानीकैः संकुलेन देवया
नेनाकाशमार्गेणावतरंती सप्तर्षिभ्योवोगेव प्रायणः कमिणागतिरितितनोवोगेवसंकुल।

अभिस्यंदंती अभितो गच्छंती ५ केसराचलानां मेरुमानोह्वायनात्प्रथमं तेषामादिगिरिशिख
रेषु मस्तकोर्ध्वं गोष्ठुपततितततः तेभ्योधोधः प्रस्रवंती सती ६ माल्यवच्छिखरात् केतुमाला
भिमुखं विनिष्पतंती चक्षुः संज्ञा ७ गिरिशिखरादितिऊर्ध्वदृशिखरानुच्चलिता नीलशिख
रं ततरुच्चलिता ख्येन शिखरं ततश्च अतिहाय शृंगात् अधः स्रवंती ८ अतिरभसतररंहसा अ

नवरत चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशम् अभिस्यंदंती नदनदीपतिमेवाभिनिवि
शति सीतालकनंदा चक्षुर्भद्रेति ५ सीता तु ब्रह्मसदनात् केसराचलादिगिरिशिखरेभ्योधोध
ः प्रस्रवंती गंधमादनमूर्द्धसु पतित्वा अंतरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रम
भिप्रविशति ६ एवं माल्यवच्छिखरान्निष्पतंती ततोनुपरतवेगा केतुमालमभि चा
क्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ७ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरि
शिखराद्गिरिशिखरमतिहाय शृंगवतः शृंगादवस्यंदमाना उत्तरांस्तु कुरूनभित उदी
च्यां दिशि जलधिमभिप्रविशति ८ तथैवालकनंदा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरि
कूटान्यतिक्रम्य हेमकूटात् हिमकूटात् अतिरभसतररंहसा भवयंती भारतमभिव
र्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति ९ यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदे अश्व
मेधराजसूयादीनां फलं न दुर्लभमिति अन्ये च नद्या नद्यश्च वर्षे वर्षे संति बहुशो मेर्वादि

स्खलितनीव्रतवेगेन ९ बहुशः बहुविधाः मेर्वादिगिरीणां दुहितरः तत्प्रसूताः १० दिव्यभौ
मबिलभेदात् त्रिविधः स्वर्गः तत्र भौमस्वर्गस्य पदानि स्थानानि निरूपयिष्यति ११

अफलेषु हीयमानेन आयुर्वर्षाणि येषां वज्रवद्दृढं संहननं शरीरं तस्मिन् बलं वयो भोगाः तैः प्र
मुदितानि युगानि महासोदराणि मिथुनानि तेषां अवायापवर्गसंभोगावसाने एकवर्षशेषे आयक
षिमतनुएकोगर्भोयैः नाट्यानि कलत्राणि येषां त्रेताफरासमः विषयस्रोतोत्कर्षोनत्तूनफरो
हिसर्वेध्यानतिष्ठाः हापरादौतरुः त्रिबहुलाः १२ तत्र येषु वर्षेषु देवपतयः सैः सैः सेवकाणि
पुमतैः हृतमहोपचाराः संतः सैरं विहरंतो त्यनयः केषु स्थानेषु सर्वेषु अनन्तेषु अजस्रमस्रवा।

येषु पुरुषाणामफलेषु हूयमानेषु वर्षाणां देवकल्यानां नाना युग प्राणानां वज्रसंहननब
लवयोमोदप्रमुदितमहासोदरमिथुनअवायापवर्गावर्षयूने कगर्भकलत्राणां त्रेत
त्रेताफरासमः कालोवर्तते १२ यत्रह देवपतयः सैः सैर्गणनायकैर्विहितमहार्हणाः
सर्वर्तुकुसुमस्तबकफलकिसलयश्रियानम्यमानविटपलताविटपिभिरुपशुंभमा
नरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधन
ववनरुहामोदमुदितराजहंसजलकुक्कुटकारंडवसारसचक्रवाकादिभिर्मधुकरनिक
राकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुंदरीणां कामा।

कादीनां श्रियासमस्याअनंतेनम्यमानाविटपास्तदाश्रितापेषु तैर्विटपिभिरुपशुंभमानानि
एवमभमानानिरुचिराणिकाननानि येषु तेषु आश्रमायतनेषु वर्षगिरिद्रोणीषु च तथाचअमले
षु जलाशयेषु च विकचानि विविधानि यानि नवानि वनरुहाणि तेषां आमोदेन मुदि
तैराजहंसादिभिर्मधुकरनिकराणां च आकृतिभिर्जातिविशेषैरुपकूजितेषु कामेन कलितैः

नवस्वपि वर्षेषु येपुरुषास्तेषां तदनुग्रहाय सत्वासौ वहमाणो नुग्रहस्तदर्थं आत्मतत्त्वमूहेन सम
र्निसम हेन संनिधीयते संनिहितो भवति ४ अपरश्चार्वाचीनः पश्चान्नवमस्कंधे ५ भवानीना
था स्वामिनी येषां तैः स्त्रीगणानामर्बुदसहस्रैरवरुध्यमानः सर्वतः सेव्यमानः आत्मनः प्रकृति
कारणं आत्मनि समाधियानेयस्मात्तन्न रूपेणोतहृदयमाणं मंत्रादिकं अभिरणन्नजपन् ६

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वमूहेनात्मा
नायापि संनिधीयते ४ इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्वि
शति भवान्याः शापनिमित्तज्ञः यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ५ भवानीना
थैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं
मूर्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामात्मसमाधिरूपेण संनिधाप्यैतदभिगृणन् भ
व उपधावति ६ ॥श्रीभगवानुवाच॥ ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायान
न्तायाव्यक्ताय नम इति ७ भजे भजन्यारणपादपंकजं भगस्य कृत्स्नस्य परं परायणं
भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरं ८

सर्वेषां गुणानां संख्यानं प्रकाशो यस्मात्तस्मै अनन्ताय अव्यक्ताय अप्रमेयाय ७ हे भजन्य भजनीयत्वा
त्वां परं ईश्वरं भजे इत्यन्वयः अरणं पादपंकजं यस्य कृत्स्नस्य भगस्य ऐश्वर्यादि षाड्गुण्यस्य पर
मायनं आश्रयं भक्तेष्वलमत्यर्थं भावितं प्रकटितं भूतभावनं स्वरूपं येन भवापहं संसारहरं भ
के च्छित्वनवद्यंगः भवे भावयतीति तथा तं अथात्र भक्तेषु इति द्रष्टव्यं ८

भा· पं· ५८

ईश्वरत्वमुपपादयंस्तामसत्वेनप्रसक्तमनादरं वारयति नयस्येति निरीत्यमाणस्यापि दृष्टिर्माया।
गुणैर्विषयेस्मिन्नहूतिभिः कारणैः स्वस्यापि दृष्टपिनाज्यतेनलिप्यते किमर्थं निरीत्यमाणस्य ईशो
ईशानादनियमनायईशानमीदृशंपदादित्वाज्ञाविश्रिष्ट अत्र वैयर्थ्यदृष्टांतः यथा अजिनक्रोधवेला
नोनोस्माकं दृष्टिरज्यते नेननयेति अतः आत्मनइंद्रियाणिजिगीषुः जेतामिछं नसत्तः तेकोनमन्येन
नाद्रियेत १९ नन्वसत्तामयाभ्यामनस्य कृतो दृष्टिर्नोज्यते तत्राह असतो दृक्दृष्टिर्यस्यतस्य स्वमाय
यातीवामनइवयोभयंकरःप्रतिभाति मध्यासनाभ्यामानामवलोचनइवचनानावधूविमोहनेनन।

नयस्य माया गुणचित्तहृतिभिर्निरीक्षिणो ह्यापि दृष्टिरज्यते ईशो यथानोजिनमन्युरीदृ
शांकस्तेनमन्येनजिगीषुरात्मनः १९ असद्दृशोयःप्रतिभाति मायया तीवैवमध्यासव
नामवलोचनः ननामवध्वोहृणाईशिरेंद्रियायत्पादयोःस्पर्शनवर्षिते द्वियाः २० यमा
हुरस्यस्थितिजन्मसंयमं त्रिभिर्विहीनं यमनंतमव्ययः नवेद सिद्धार्थमिवक्वचित्स्थितं
भूमंडलेमह्रुं सहस्त्रयामसु २१

यः प्रतिभाने फलभिन्नमोहजपादोर्वनेयस्य पादयोः स्पर्शनेन वर्षितं मोहितमिंद्रियं मनो यासां ताः
द्रियालज्जया भूतायाम्हणेन ईशिरेन प्राक् कस्तेन मन्येनेति पूर्वेणान्वयः २० अस्यविश्वस्य
स्थितिजन्मसंयमहेतुंयमाहुः अत एव त्रिभिः स्थित्यादिभिर्विहीनं अनंतं च यमाहुः अव्ययो म
त्राः क्रं दोष्वरोपेन दीर्घपाठे अकारो देवमानाल लक्ष्मीः सा वत्र एव प्रेत्यर्थः अनंतं न वेद यो यति
मर्हं सहस्त्र मेव याम निष्याला ता ति नेत्र भक्वचिदेकदेशो स्थितं भूमंडलेयोन वेद सिद्धार्थं सर्षपमि
वतस्येन मन्येतिचतुर्थेनान्वयः २१ ॥ ५८

तत्र जन्म हेतुत्वं महदादिद्वारेण प्रपंचयति यस्याद्य इति निर्मितो महात्मा सविग्रहस्यासीत विज्ञा
नसहितं धिष्ण्यमाश्रयो यस्य सः तस्य चित्स्वरूपत्वेन सत्वप्रधानत्वात् स एव किलादिदेवो वासुदेवा
भेदविवक्षया भगवानजो ब्रह्मा यत्संभवः यस्माद्ब्रह्मणः अहं रुद्रः संभूतः त्रिवृता त्रिगुणेन स्व
तेजसा स्वविभूतिरूपेण अहंकारेण विकारिकं देवतावर्गं तामसं भूतवर्गं ऐंद्रियं इंद्रियवर्गं
च सृजामि २२ किंच एते वयं महदादयः सर्वे यस्यानुग्रहादिदं ब्रह्मांडं सृजामः कथंभूताय

यस्याद्य आसीद्गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः किल यत्संभवोहं त्रिवृता
स्वतेजसा वैकारिकं तामसमैंद्रियं सृजे २२ एते वयं यस्य वशे महात्मनः स्थिताः शकुं
ता इव सूत्रयंत्रिताः महानहं वैकृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदं २३ य
न्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोयं गुणसर्गमोहितः न वेद निस्तारणयोग
मंजसा तस्मै नमस्ते विलयोदयात्मने २४ ॥ इति श्रीभागवते पंचमे सप्तदशोध्यायः १७

स्य महात्मनो वशे स्थिताः संतः यंत्रः सूत्रेण क्रियाशक्त्या यंत्रिताः प्रेरिताः शकुंताः पक्षिण इव
लौकिकेन सूत्रेण बद्धयंत्रिता कौतुकेन नानेवाहं महानहंकारश्च वैकृतादयः पूर्वोक्ता वर्गाश्च २३
स्थितिलयहेतुत्वं दर्शयन्नमति येन निर्मितां मायामेवायं जनोंजसा वेद न तत्र निस्तार
योगं उपायं कर्हिचिदपि वेदेति स्थितिहेतुत्वं दर्शितं कीदृशीं कर्माण्येव पर्वाणि ग्रंथयः ता
नि नयति प्रापयति तया तां प्रलयहेतुत्वमाह विलीयते स्मिन्निति विलयः उदेत्यस्मादि

अष्टादशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनं भद्रश्रवा वर्षप
तिः तस्य कुलपतयः सेवकमुख्याश्च १ भद्रश्रवस ऊचुरिति प्राणमन्त उपधावन्तीति वर्त्तमानल
क्षणयानयोमाङ्गुलिषु लिङ्गसमवायन्यायेन बहुवचनं २ अयं जनो मिषन्नपि पश्यन्नपि ।
घ्नन्तं हि संतं न पश्यति कालो वयमिति भगवद्विचेष्टितमेव तच्च विचित्रमदर्शने लिङ्गं पुत्रं वा

श्रीशुक उवाच॥ तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षा
द्भगवतो वासुदेवस्य प्रियां तनुं हयशीर्षाभिधानां परमेण समाधिना सन्निधाप्येदमभि
गृणन्त उपधावन्ति १ **भद्रश्रवस ऊचुः** ॐ नमो भगवते धर्मायात्मविशोधनाय नम इति
२ अहो विचित्रं भगवद्विचेष्टितं घ्नन्तं जनोऽयं हि मिषन्न पश्यति ध्यायन्नसद्यर्हि विक।
र्मसेवितुं निर्हृत्य पुत्रं पितरं जिजीविषुः ३ वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चा।
ध्यात्मविदो विपश्चितः तथापि मुह्यन्ति तवाज मायया सुविस्मितं कृत्यमजं नतोऽस्मि तं ४

ले पितरं वृद्धं देहमजे निर्हृत्य दग्ध्वा स्वयं तदुपभोग्यधनैः जिजीविषति जिजीविषुमिच्छतीति पाठान्तरे तु।
छेदः सामञ्जस्ये जिजीविषति किं परमार्थेन यर्हि यतः असत्तुच्छविषयसुखं सेवितुं विकर्म पा
पमेव ध्यायन् ३ ननु विद्वान्न पश्यति किमत्र विचित्रं तत्राह नश्वरं वदन्ति स्म पश्यन्तः पश्यन्ति
च स्मायो हे अज तथापि मायया मुह्यन्ति एतच्च तव कृत्यं चेष्टितं सुविस्मितं अति विचित्रं अतः प्र

ऽद्भुतमपरं चित्रवत्प्रतीयमानमपि तत्त्वयि न चित्रमित्याह विश्वस्योद्भवादिकर्म अकर्तुरपि अपा-
वृतस्यावरणशून्यस्य यस्मात्तादृशस्यापि ते अङ्गीकृतं वेदेन तत्त्वयि न तु चित्रं यतः मायया सर्वात्म-
नि कार्यस्य कारणे स्रष्टृत्वादिकर्म युक्तं वस्तुतः सर्वव्यतिरिक्ते निरुपाधावनावृतत्वमकर्तृत्वं च यु-
क्तं ५ परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचरितमाह वेदानिति तमसा दैत्यरूपेण तिरस्कृता-
न् अपनीतान् नृनाचतुरंगाश्च नरतुरंगौ तद्रूपो विग्रहो यस्य कवये ब्रह्मणे तदर्थं अवितथेहिता

विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरङ्गीकृतमप्यपावृतः युक्तं न चित्रं त्वयि कार्यका-
रणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ५ वेदान्युगान्ते तमसा तिरस्कृतान्रसातलाद्यो नृतु-
रङ्गविग्रहः प्रत्याददे वै कवये ऽभियाचते तस्मै नमस्ते ऽवितथेहिताय ते ६ हरिवर्षे चापि
भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरु-
षगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादो ऽव्य-
वधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ७ ॐ नमो भगवते न-
८ रसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान्रंधय रंधय तमो ग्र-

यसत्यसंकल्पाय ६ उत्तरत्र प्रह्लादचरित्रे महापुरुषस्य गुणानां भाजनमाश्रयः दैत्यदानव-
कुलस्य तीर्थीकरणशीलमाचरितं च यस्य फलसंकल्पेन अव्यवधानः अन्यस्याश्रयस्याव्य-
भिचारी यो भक्तियोगस्तेनोपास्ते सेवते ७ तेजसामपि तेजसे आविराविरिति प्रकटो भव वीप्सा-
वा कर्माशयान् वीप्सा वा कर्मवासनाः रागादीन् रंधय निर्दह मम स्थिताः मयाः ८ ॥

भा० पं० ६६

विश्वस्यस्वस्तिप्रार्थनेखलस्यापिभवेत्ततस्वसाधुधीरांविनानस्यात् अन्योन्यमसंगात्ध्यायतोचभ
तानांअन्योन्यद्रोहेविनानभवेदित्याशयेनाह खलः प्रसीदतु क्रौर्यंत्यजतुभूतानिचमिथःशि
वमेवध्यायंतुतेषांमनः चभद्रंशुभंधारणातत्किंभजतुनः अस्माकंमतिमतिः अधिष्ठानंभगवानो
मतिः अहैतुकीनिष्कामासती ९ नःसंगात्कापिमास्यात् यदिकथंचित्स्यात्तर्हिअगारादिषुमा
स्यात् किंतुभगवत्प्रियेष्वेवअगारादिसंगेदोषमाह यइति इंद्रियप्रियःदाराद्यासक्तः १ भगव
त्प्रियसंगेगुणमाह येषांभगवत्प्रियाणांसंगात्लब्धंमुकुंदविक्रमंश्रुतिभिः श्रवणादिभिः स

स्वस्त्यस्तुविश्वस्यखलःप्रसीदतांध्यायंतुभूतानिशिवंमिथोधिया मनश्चभद्रंभजतादधो
क्षजेआवेश्यतांनोमतिरप्यहैतुकी ९ मागारदारात्मजवित्तबंधुषुसंगोयदिस्याद्भगवत्प्रि
येषुनःयःप्राणवृत्त्यापरितुष्टआत्मवान्सिध्यत्यदूरान्नतथेंद्रियप्रियः १० यत्संगलब्धंनि
जवीर्यवैभवंतीर्थंमुहुःसंस्पृशतांहिमानसंहरत्यजोतःश्रुतिभिर्गतोंगजंकोवैनसेवेत
मुकुंदविक्रमं ११ यस्यास्तिभक्तिर्भगवत्यकिंचनासर्वैर्गुणैस्तत्रसमासतेसुराः हरावभ

स्पृशतांसेवमानानांपुंसामंतर्गतोजःमानसंमलंहरतिकथंभूतंनिजमसाधारणंवीर्यंवैभवंप्रभा
वातिशयोयस्यतीर्थंगंगादिमुहुःसंस्पृशतामंगजंमलंकेवलंहरतितंकोवैनसेवेतेत्यन्वयः ११
मानसमलापगमफलमाह यस्येति अकिंचनानिष्कामामनः अहोहरेर्भक्तिर्भवतितेनःच
तत्प्रसादेसतिसर्वेदेवाःसर्वैर्गुणैःज्ञानवैराग्यादिभिःसहतत्रसम्यगासतेनित्यंवसंतिअहा
यासतःकस्यतुकुतःहरिभक्तेरसंभवात्महतांगुणाःज्ञानवैराग्यादयोभवेतिअसतिविषयसेवे

नवहरिविमावस्यग्रहाघासक्तस्यापिलोकेमहत्वंदृष्यतेसन्यंतद्रूपंहासास्पदमितिसदेतकमा।
हहरिर्हीति यथाकथानोमीनानामीप्सितंतोयमेवात्मातेनविनाजीवनाभावात्महानतिप्रसि।
द्धोपिरहेयदासमन्ततेनतदांपतीनांमिथुनानांमुद्रादिष्वपिप्रसिद्धंवयसेवयत्केवलंमहत्वंनदेव
तस्यभवतिनततत्तानादिना मिथुनेषुनेषुएज्यमानेषुस्त्रीभ्यः पुंसांमहत्त्वंबालमिथुनेभ्यश्चवृद्धमि
थुनानांमहत्वंयथेत्यर्थः ११ यस्मादेवंतस्मात्तद्धेहिमाकृतोभयंनसिंहपादंभजतेन्यसरानुप
द्रिणाति कोहृष्टशरहेरजःतस्माभागोभिनिवेशः रजस्त्रादीनामलंकारणात्रनथवसेसतोनाज।
हरिहिंसात्ताद्भगवान्प्राणीरिणामात्माकषाणामिवनोयमीप्सितं हितामहोत्स्येयदिसत्तते
रहेनदामहत्वंवयसादंपतीनो १२ तस्माद्धृतोरागविषादमनुमानस्फहामयदेन्याद्विमले
हितामहेसंसृतिचक्रवालेनसिंहपादंभजतनाकुतोभय १४ केतुमालभगवान्कामदेवस्व°
रूपेणालक्ष्म्याःप्रियचिकीर्षयाप्रजापतेर्दुहितॄणांतद्वर्षपतीनांपुरुषायुषाहोरात्रपरिस
ख्यानानांयासांगर्भामहापुरुषमहास्त्रतेजसोद्विजितमनसांविध्वस्ताव्यसवः संवत्सरान्तेनि
पतंति १५ अतीवसुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलयाकिं।
चिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रियारमांरमयन्निंद्रियाणिरमयते १६
नमरणाद्दीनोचक्रवालेमंडलमविच्छेदोयस्मात् १४ केतुमालेपिकामदेवस्वरूपेणआस्तेइतिशे
षः किमर्थमास्तेइत्यतआह लक्ष्म्याइतिप्रजापतिः संवत्सरः संवत्सरोवैप्रजापतिरितिश्रुतेः त
स्यदुहितरोरात्र्यभिमानिन्योदेवताः पुत्राश्चदिवसाभिमानिनोदेवाःतेषांप्रियचिकीर्षयापुरुषायु°
षेणतेनयावन्त्योरात्रयस्तैःपरिसंख्यानंगणनायेषांषट्त्रिंशत्सहस्राणामित्यर्थः यासांदुहितॄ
णांमहापुरुषस्यमहास्त्रंचक्रंतस्यतेजसा १५ रमांरमयन्स्त्रीयानींद्रियाणिरमयतिकेनसाध

भा॰ पं॰ ६१ तद्भर्तृभिर्दिवसाभिमानिभिरुपेता १७ सर्वैः गुणविशेषैः श्रेष्ठवस्तुभिः विलक्षितः लक्षीकृतः
आत्मा यस्य आकूतीनां क्रियाणां चित्तीनां ज्ञानानां चेतसां संकल्पाध्यवसायादीनां विशेषाणां त
द्विषयाणां षोडशकलाय षोडश कलाः एकादशेंद्रियपंचविषयलक्षणा यस्य छंदोमयाय वेदोक्तक
र्मप्राप्याय अन्नमयाय अन्नोपष्टंभकत्वात् अमृतमयाय परमानंदाविष्कारात् सर्वमयाय सर्वविषयत्वा
त् सहसे ओजसे बलाय कांतहेतुत्वात् १८ तत्कामेनैव तत्सेवकत्वात् अहं हृतार्थोऽस्मि अन्यकाम १८

तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमादेवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभि
रुपेताहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति १७ ॐ ह्रां ह्रीं ह्रूं ॐ नमो भगवते हृषीकेशा
य सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये
षोडशकलाय छंदोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कांता
य कामाय नमस्ते उभयत्र भूयात् १८ स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो ह्याराध्य लोके पति
माशासतेऽन्यं तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोऽस्वतंत्राः १९ स वै पतिः स्यादा
कुतोभयः स्वयं समंततः पाति भयातुरं जनं स एक एवेतरथा मिथो भयं नैवात्मलाभाद धि मन्यते परं २०

न यात्तत्त्वामर्चतो न परिपूर्णमनोरथाः स्युरित्याह स्त्रिय इति स्वत एव हृषीकाणामीश्वरं पतिं सेते
तामाराध्यतः स्त्रियः अन्यं पतिं प्रार्थयंते पतिकामा नो हि कामाराधनेव्रतेषु प्रसिद्धं तासामपा
त्यादीनि ते पतयो न पातुं शक्ताः १९ अतस्त्वं पतय एव न भवंतीत्याह स वा इति स चैवं भूतः प
तिः भवानेक एव नान्यः प्रियो भवानात्मलाभात् परमधिकं न मन्यते इतरथा अन्याधीन स्वरस्य

[illegible] ६१

किं च निष्कामभजनेन प्रार्थितं न एव सर्वे कामा भवंति सकामभजनेन तु कामितमात्रमनित्यं चेत्याह या
हीनस्नेहो कलत्रदासपत्नेपादसरोरुहस्पर्शाहंता पूजामेव कामयेत न फलांतरं अखिलेषु कामेषु ले
पटाः सर्वो न कामान्प्राप्नोतीत्यर्थः दुःखिता मोक्षिताः फलांतरकामयेत्थिताः सत्यं चिंतयंत हि न
देवैकेशास्विट्टदासि किंच यद्यतः फलभोगानंतरं भयप्रायं तथापि यो वितोयो यस्माः सा प्रतप्यते दुःख
प्राप्नोति न देवदासि न तु नित्य २१ न तु मम महेशलोकतः सर्वकामप्राप्तिः त्वमेव कामार्थिभिः सेव्योसि
अत आह मत्प्राप्तये ब्रह्मादयस्तपस्तप्यंते कथम् ज्ञाताः ते ह्रियेत्सुविधीः येषां अल्पकत्वमासः न थापि
यानस्यनेपादसरोरुहार्हणं निकामयेत्साखिलकामलंपटा न दैवकासीष्मितमीप्सितोर्थिनो य
दुःखयाज्ञाभगवन्प्रतप्यते २१ सत्कामयेत शश्वदादयस्तप्यंतः अतनपेत् ह्रियेपिपः अतो
भवत्पादपरायणा न मां विदंत्यहं त्वहृदयायतो जितं २२ सत्वं ममाप्यच्युत शीलिवेदितं क
रांबुजे यत्नदथापि सावतो विमशितांलस्सवरेण मायया कर्ड स्पर्श स्पृहितं महितं विभुः
२३ स्वकेच भागवतः प्रियतममास्य भवतारूपं तद्दर्षगृहस्थमनो प्राकृप्रदर्शित सद्दा
नीमथमहत्त्वा भक्तियो गेना शयति दृष्टवोदाहरंति २४ ओं नमो भगवते मुख्यतमाय नमः स
त्वाय प्राणाय ओजसे बलाय महते मन्यवे नमः २५ अंतर्बहिश्चाखिललोकपालकेरदृष्टरू
भवत्पादपरायणा हृतेमानविदंति मत्काटात्सविलक्षितानाविभृतीनं लभंते इत्यर्थः यत्र त्वमेव बह
दृश्यवस्थाः साहं त्वप्यातेत्रतान्तदनुवर्तिनमेव विलोकयामि नान्यमित्यर्थः २२ इदानीं तत्कृपापा
त्रोपयुते सत्त्वामि निनदितिनि यापयक्तरांबुजसानतमोभक्तानां कोसि अथापि कृपयान्यत्तनंमापि
कोसिस्लिनिपेहीतिपेषः कथं भजं वेदित सर्वकामवर्षिहेन सद्धिः स्तनेलचनृवमथ्यनादरः यतः हे
वरेण्यमां वत्नाखिलेस्म विमर्शितं ग्रहोविचित्रमेतन्मायि केवलमाद्दस्मात् भक्ते श्रुतपरमा कृपा अतः
नवंप्यक्ष्यरस्यमायया हितं न तत्का चिंतके पितु समर्थः २३ स्पृहे २४ सत्यप्रधानायमुख्यतमाय प्रा

२६ ॥

नत्विंद्रादयो वर्णयंति लोकपालत्वात् ऊनोहं तत्राह मत्सरएव ज्वरो येषां तेयं हितादिपदः च
तुष्पदः सरीसृपं जंगमं स्थाणुं स्थावरं च यदत्र दृश्यते तेन किंचिदपि पातुं न शक्ताः सहमेव प्राणारू
पेण पालकं ऋष्यस्त्रेत्यर्थः तथा च श्रुतिः नास्य हिंसन्नाह मृत्कमस्य हमत्कमस्मीत्यादि २० स्व
वनावस्वमितमाह भवान्युगांतेर्णाणि मयामवनासहमत्सहितात् पृह्नेत्यध्याहारः ऊर्मिमालावतिप्र
लयार्णवे ओजसा उरुक्रमते विचरति यद्वा पातुमित्यस्यानुषंगः क्षोणीपातुं क्रमते अस्य हेतुः अत्य

यं लोकपालाः किल मत्सरज्वराहिताय तेनोपि पृथक् समेत्य च पातुं न शेकुः द्विपदच्चतुष्प ३८
दः सरीसृपं स्थाणु यदत्र दृश्यते २७ भवान्युगांतार्णव ऊर्मिमालिनि क्षोणीमिमामोषधि
वीरुधां निधिं मया सहोरु क्रमतेज ओजसा तस्मै जगत्प्राणगणात्मने नमः २८ हिरण्मये च
भगवान्निवसति कूर्मतनुं बिभ्राणः तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणा।
धिपतिरुपधावति मंत्रमिमं चानुजपति २९ ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणवि
शेषणायानुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमो नमोवस्थानाय नमस्ते ३०
यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपं बहुरूपरूपितं संख्या न यस्यास्त्ययथोपलम्भनात्तस्मै

र्थः यतस्त्वमजः कीदृशीं ओषधीनां वीरुधां च निधिं आश्रयभूतां तस्मै नमः जगतो यः प्राणगणः तस्या
त्मने नियंत्रे २८ तत्प्रियतमां तां प्रियतमाम् २९ अकूपाराय कूर्माय सर्वैः सत्त्वगुणैः वि
शेषणं यस्य अनुपलक्षितस्थानेयस्य वा निरवतानां वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय भूम्ने स
र्वगताय अवस्थानायाधाराय ३० निजमायया अर्पितं प्रकाशितं यत्नदर्थस्वरूपं एतद्दृश्यं दृश्यमादिव
सेव रूपं यतः दृश्यमास्तिकत्वेभजे बहुभिः रूपैः रूपितं यस्य वंसंख्या नास्ति ऊनत्र अयथापामिथ्ये वोप

वहूहं प्रपंचं दर्शयन्न तस्मै स्वरादव्यतिरेकमाह जरेति हीयग्रहतो ऽन्यमिथेयः न मे वैकः न वनस्थतिरि
कोऽस्ति सर्वं खल्विदं ब्रह्मेति श्रुतेरित्यर्थः १२ सप्रपंच नामरूपमतत्त्विरासेन स्वरूपमतियस्मिंस्त्रिति
त्र संख्येयाः स्वेन ताः विशेषायेषां तानि नामानि रूपाणि सांख्याकृत नयस्य यस्य नारूपेयस्मिन्न त्वयि कृवि
भिः कपिलादिभिरिंपंचतुर्विंशत्यादिसंख्या कल्पितास्तीयथा नत्वरूपानतत्त्वानेनापनीयतेन
स्मै सांख्यसिद्धांतरूपाय नमः परमार्थरूपायेति १३ एषाम रूपथावत्तिहेत्वन्वयः १४ मंत्रैस्तत्वेन
लिंग्यते इति तस्मै स्वरूपाः यत्ताः क्रतवः स्वरूपाः तद्रूपाय स्वतः एवमहात्मौपराः स्रवयवभजाय स्व
जनाय कृत्स्नेदजमेर जोऽग्निजे व राचरं देवर्षिपितृभूजनमैन्द्रियं द्यौः खल्वितिः शैलसरित्समुद्रही
पग्रहतैन्यमिथेयएकः १२ यस्मिन्न संख्येयविशेषनामरूपाकृतोक विभिः कल्पितेयं संख्या
यथा ततत्वरूपापनीयते तस्मै नमः सांख्यनिदर्शनाय १३ अतरेषु कुरुषु भावाव्यत्तपुरुषः कृ
नवरद्रूप स्रा सेन तंतुदेवोहैवामः सहकुरुभिर सर्वलिनभक्तियोगेनोपपावति इमोचपर
मामुपनिषदमावर्तयति १४ उँ नमो भगवते मंत्रतत्त्वलिंगाय यज्ञक्रतवे महाध्वरावयवाय
महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते १५ यस्य तद्रूपकवयो विपश्चितो गुणाबुद्धा
ह्वि वर्जातवेदसं मथ्नंतिमथ्या मनसा दिदृक्षवो गूढं क्रियार्थे नमः ईरितात्मने १६ द्रव्यक्रि
कर्मणा शुक्लाय शुद्धाय यज्ञानुष्ठाने त्रियुगाय कृतयुगो यज्ञाभावात यद्वा कलियुगे छन्नत्वात् १५
कवयो विद्वांसः विपश्चितो निपुणा गुणाबुद्धे हे ह्वियादि युमथ्नंति विविनंति मथ्या विवेक साधनेन म
नसा क्रियार्थैः कर्मभिः तत्फलै स्वर्गादिभिः प्रकाशमानं दिदृक्षवः एवं मंथनैरीरितः प्रकटितः आत्मा
स्वरूपं यस्य तस्मै नमः १६ मथनमेव दर्शयन् आह द्रव्यं विषयः क्रियां इंद्रियव्यापारः हेतु देवतास्त्यनं
देहः ईशः कालः कर्ता अहंकारः एतैर्मायागुणैः कार्यरूपलक्षणैः वस्तुतेन निरोहितोय स्मात्तस्मै

तद्देवं निर्गुणमहमेवानन्तापरमेश्वरस्वरूपेण प्रणमति यस्येति न जीवार्थमीप्सितं अन्येनानिष्ठायामी
क्षणयोगात् स्वार्थं तु नेप्सितं विश्वस्थित्यादि स्वगुणैर्माया करोति तस्या जडत्वेपि ईश्वरसन्निधा-
नात्प्रवृत्तिं दृष्टान्तेनाह यथा अयः लोहं ग्रावाणः अयस्कान्तान्निमित्तात् भ्रमति तदाश्रयं तदभिम
तं समनन्तरगुणाः कर्माणि जीवानां हृद्यानां च साक्षित्वेन तस्मै ते नमः ३८ अवतारचरितमाह जगतामा
दिकारणं सूकरः सूकरः मां पृथ्वीं मदग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलात् प्रमथ्य मलयार्णवात् उदगात् इवनिर्गम

करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः मायायथायोभ्रमते तदा
श्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ३८ प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदा
दिसूकरः कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणतास्मि तं विभुं ३९ इति श्रीभाग
वते पंचमस्कंधे ष्टादशोध्यायः १८ ॥ शुक उ० ॥ किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणा
ग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान्सह किंपुरुषैरवि
रतभक्तिरुपास्ते १ आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्क
थां समुपशृणोति स्वयं चेदं गायति २ ॐ नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशी
लव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्म

न ननमप्रति गजतुल्यं दैत्यं प्रमथ्य यः क्रीडन् स्थितः तं प्रणतास्मीत्यन्वयः ३९ ॥ इति भावार्थ
दीपिकायां पंचमे ष्टादशोध्यायः ॥ कृतविशेषं किंपुरुषे भारते चोपवर्णयते सेव्यसेवकभावप्रभावतश्रेष्ठा-
मेव च १ भर्ता स्वामी भगवान् तच्च तस्य कथां २ आर्यायां लक्षणानि शीलं व्रतं च यस्य उपशिक्षि
तात्मने संयतचित्ताय उपासितो नुसृतो लोको येन साधुवादः साधुत्वप्रसिद्धिः तस्य निकषणा

[illegible] ५

[illegible] २

श्रीरामे परमार्थरूपेणानुमतिपदे कं वेदान्तेषु प्रसिद्धं न तं तन्मायपञ्चेकथं भवते विशुद्धस्यासौ आ-
नुभवस्वरूपमात्रास्वरूपं यस्य तत्र हेतुः प्रशान्तं तत्रापि हेतुः स्वतेजसा स्वरूपप्रकाशेन ध्वस्ता
गुणानां विविधा जाग्रदाद्यवस्था यस्मिन् अनुभवमात्रत्वे हेतुः प्रत्यक् रूपपराद्यन्यत्ततः अ-
नामरूपं न वस्तुतः एवंभूतस्यापि जीवस्यो कस्ते विपर्ययो रूपप्रतेन त्राह निरहं अहंकाराभावा-
त्तत्स्थानेव प्रतीत्यमित्यर्थः ननु श्रीरामस्य स्वरूपेनैव प्रतीयते तत्राह सुधिया प्रसादुपलभ्यते ४।
नुपलंभनेषु हूचितेन तु प्रसन्ने नैव प्रतीयते उपलभ्यते इत्यर्थः कथं नहि दृष्टपरार्थ्यप्रतेन तत्राह विभोः
मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव यत्तस्य मनःकाटन्यतोवधतान न केवलमेतावत् किं तत्राह स ।
यत्र हि शुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थं प्रत्यक् प्रशान्तं सुधियोपलम्भनं ह्यना-
मरूपं निरहं प्रपद्ये ४ मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः कुतोऽन्य-
था स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य ५ न वै स आत्मात्मवतां सुहृत्त-
मः सक्तः त्रिलोक्यां भगवान्वासुदेवः न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुम-
र्हति ६ नन्वस्य तन्नमहत्तो न सोऽभगवान्वा तु बुद्धिर्नो कृतिर्लोभहेतुः नैवेत्याह स आत्मापि नो वनो-
त्तारेशो संगादिकृते उत्तेरेवां रमितिमर्त्यो नोपितत्वं च शिक्षार्थमपीत्यर्थः अन्यथा स्वस्वरूपे रममाण-
स्य जगदात्मनः सीताविरहकृतानि व्यसनानीति कुतः स्यात् ५ विषयासक्त्यभावे असक्तान हेतुमुपपा-
दयति नवैस भगवान् त्रिलोक्यामपि सक्तः यत आत्मवतां धीराणामात्मा सुहृत्तमः अतो न स्त्रीकृतं मो-
हं प्राप्नुयात् न लक्ष्मणं चेति देवहूतेन श्रीरामसंमत्ययनाविलापितं अग्निप्रवेशनस्तया वध्य इति तत्र देवहा-
नि स्थितं लक्ष्मणं ऊर्वों समागते विलापयितुं प्रविष्टं हनुमद्यनोव सिद्धवाक्यान्यजानन्नत्यजत्यागोऽपि न
कल्प्यते इत्यर्थः ६ अतः श्रीरामचन्द्रः सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतुः सत्कुलजन्मादिकं भक्ति

८

म

तस्मात्सुरो वाऽन्यो वा यः कोपि श्रीराममेव सर्वप्रकारेण भजेत सकृतज्ञमल्पीयस्यापि भजनेब
हुमानिनं यः उत्तरकोसलानयोध्यावासिनः ८ उपचितैर्धर्मादिभिरग्नोपलभ्यते येन तत्तपः च
रितिर्नत्रोपशमः इंद्रियाणां संयमः उपरमो निरहंकारता आत्मवतामनुग्रहाय तस्यार्थं ईश्वरता
न. ९ भगवदनुभावउपवर्णने येन पंचरात्रेण तत्सावर्णेर्मनोरुपसरति सेवते १० उपरता
नात्म्याय निरहंकाराय ११ असक्तप्रासो विविक्तप्रसादीत स्मै नमः असकलदूपोयति अ
सुरो सुरोऽप्यथ वानरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमं भजेत रामं मनुजाकृतिं हरिं य उ
त्तराननयत्कोसलान्दिवमिति १ भारतेपि वर्षे भगवान्नरनारायणाख्य आकल्पान्तम
पचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपया
तपोव्यक्तगतिश्चरति २ तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगव
त्प्रोक्ताभ्यां सांख्ययोगाभ्यां भगवदनुभावोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्ति
भावेनोपसरति इदं चाभिगृणाति ३ ॐ नमो भगवते उपशमशीलाय उपरतानात्म्याय
नमो किंचनवित्ताय ऋषिऋषभाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इ
ति ४ गायति चेदं कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोपि दैहिकैः द्रष्टुर्न दृ
ग्यस्य गुणैर्विदूष्यते तस्मै नमोसक्तविविक्तसाक्षिणे ५ इदं हि योगेश्वरयोगनैपुणं हि
स्यविष्य सर्गादिषु कर्तापि यो न बध्यते अहंकर्तेति न मन्यते विविक्तत्वात् विविक्तत्वमाह देह
गतोपि दैहिकैः तृण्पिपासादिभिः यो न हन्यते नाभिभूयते साक्षित्वमाह यस्य द्रष्टुरपि सतो दृश्यैः
गुणैर्दृश्यत्वेन न दूष्यते न विक्रियते ५ योगकौशलं निरूपयन् योगं प्रार्थयते इदं हीति त्रिभिः हे

न्य यातनस्य शास्त्राभ्यासादिश्रमो व्यर्थ इत्याह ऐहिकामुष्मिककामेषु लंपटो मूढः सुतदारा
दिषु योगक्षेमं चिंतयन् कुत्सितस्य कलेवरस्यात्ययात्मृत्योः शंकेत तथा विद्वानपि सन् यः शंके
त तस्य यत्नः श्रम एव १४ यस्मादिंद्रियाणां यमेवं दृष्टानस्मात्हे प्रभो अधोक्षज तमेव नो योगं विधे

यथैहिकामुष्मिककामलंपटः सुतेषु दारेषु धनेषु चिंतयन् शंकेत विद्वान् कुकलेवरा
त्ययाद्यस्तस्य यत्नः श्रम एव केवलं १४ तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहंमम
तामधोक्षज भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावं १५ भारतेप्यस्मि
न्वर्षे सरिच्छैलाः संति बहवः मलयो मंगलप्रस्थो मैनाकः त्रिकूट ऋषभः कूटकः
कोल्लकः सह्यो देवगिरिः ऋष्यमूकः श्रीशैलो वेंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमा
न्नृक्षगिरिः पारियात्रो द्रोणः चित्रकूटो गोवर्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकी
लः कामगिरिरिति चान्ये च शतशः सहस्रशः शैलाः १६ तेषां नितंबप्रभवा नदा नद्यश्च
९८ संत्यसंख्याताः एतासामपो भारत्यः प्रजा नामभिरेव पुनंतीनामात्मना चोपस्पृशंति १७ चं
द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्ता तुंग
भद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विंध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिं
धुरंधः शोणश्च नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मंदाकिनी यमुना

हि कीदृशं तत्त्वयि स्वभावं सहजवासनारूपं येन योगेन वयं त्वन्मायया नः कुकलेवरेर्पितामहंममतां
क्षीणं भिंद्याम त्यजेम सुदुर्भिदां मुमुक्षुभिरपि नरैः सर्वेषामत्यक्तुमशक्यां १५ इलावृतवदस्मिन्वर्षे सरि

भा॰
पं॰
६५

लब्धं जन्म यैस्तैः पुरुषैः सात्विकादिसक्तेन कर्मणा दिव्यादिगतय आत्मनो विधीयन्ते हि यस्मात्त
थापवर्गनयः कर्मानुसारेण सर्वेषां भवति ॥ यद्यपवर्गस्य द्विधानं नेतोह प्रकारः संन्यासवनस्थना
दिनदननिक्रमेण अस्मिन्नेव वर्षे नान्यत्र अपवर्गो भवति एतच्च कर्मादिबहुसाधनसंभवाभिप्रा
येणोक्तं न तत्रान्यत्रापवर्गाभावेन तदुपर्यपि बादरायणः संभवादिति देवानामपि मोक्षस्य सूचि
तत्वात् ॥१९॥ अपवर्गस्वरूपमाह योसाविति अनात्म्ये आत्मनि भवमात्म्यं रागादि तद्रहिते अनि

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषना
रकगतयो बह्व्यः आत्मन आनुपूर्व्येण सर्वा एव हि सर्वेषां विधीयन्ते यथावर्णविधानमप
वर्गश्चापि भवति ॥१९॥ योसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्म
नि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारे
ण यदा हि महापुरुषपुरुषप्रसङ्गः ॥२०॥ एतदेव हि देवा गायन्ति अहो अमीषां किमकारि
शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः । यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृ हा हि नः

रुक्ते वाचामगोचरे अनिलयने अनाधारे अनन्यनिमित्तः अहैतुकः भक्तियोग एव लक्षणं स्व
रूपं यस्य भवति नानागतीनां निमित्तं योऽविद्याग्रन्थिः तस्य रन्धनेन छेदनद्वारेण महापुरुषपुरुषाः विस्र
भक्ताः तैः प्रकृष्टः सङ्गो यदा तदा ॥२०॥ एतदेवमानुष्यमेव सर्वपुरुषार्थसाधनं गायन्ति अमी
षां एभिः उत स्विद् उताहो स्वयमेव साधनं विनैव हरिरेषां प्रसन्नोऽभूत् एवमुक्तस्यापगुणस्फुटः कृ
तत्वात् भारताजिरे भारताङ्गणे नः केवलं स्पृहैव यज्जन्म मुकुन्दसेवौपयिकं तन्न लब्धं जन्म यैस्तैर्लब्ध ६५
२१

सहर्षमेवाह किमित्यादि सप्तभिः फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या न किंचित्फलं कुतः यत्र फले ना
रायणपादपंकजस्मृतिः नास्ति प्रमुष्टातिशयिनामिंद्रियाणामुत्सवात् भोगात्प्रमुष्टा भ्रष्टा २२ तदा
मल्पमेवायुर्येषां वरं ते हेतुः मर्त्येनापि देहेन क्षणेनैव कालेन कृतं कर्म संन्यस्य हरेः पदं संयांति २३
अतः यत्र वैकुंठकथामृतनद्यो न संति तदाश्रयाः कथापराश्च महोत्सवा यज्ञसवा येषु तादृशाय
ते तेषामभावा सुरेशस्येंद्रस्य लोकोपि लोको न सेव्यतां २४ अप्रमत्तविरति प्राप्ताः नृजातिं ज्ञानं च तदृष्टयोः क्रि
या अत्र तदर्थानि द्रव्याणि च तेषां कलापेन संभृतां संपूर्णां अपुनर्भवाय यतन्ते वनौकाः इव वनौकसः

किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना न यत्र नारायणपादपंकजस्मृतिः
प्रमुष्टातिशयेंद्रियोत्सवात् २२ कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरं ।
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयांत्यभयं पदं हरेः २३ न यत्र वैकुंठकथासुधापगा न सा
धवो भागवतास्तदाश्रयाः न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोपि न वै स सेव्यतां २४ प्रा
प्तान्नृजातिं त्विह ये च जंतवो ज्ञानक्रियाद्रव्यकलापसंभृतां न वै यतेरन्नपुनर्भवाय ते भूयो वनौका
इव यांति बंधनं २५ यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमंत्रवस्तुतः एकः पृथङ्ना
मभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः २६ सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो

दो यत्पुनरर्थिता यतः स्वयं विधत्ते भजतामनिच्छता
मिच्छापिधानं निजपादपल्लवं २७

सः पतितोल्लब्धकामा अपि पुनर्यदि निसित्रेव बद्धास्ते प्रमत्ता विहरंति यथा वनेनेति तद्वत् २५ अहो
भारतवासिनां भाग्यमित्याह यैरिति अग्नये जुष्टं निर्वपामि इंद्राय जुष्टं इत्येवं भागशो निरुप्तमिष्टं यत्कृ
तं च विधिना प्रकारेण मंत्रेण च वस्तुतः अग्निहोत्रादिभेदेन इष्टदेवतामहिम्ना पत्यकं निरुप्तं च ममेद
मिति स्वीकुर्वता नेतुं मयानीतार्थः एक इंद्रादिनामभिराहुतः आशिषां प्रभुः स्वयं पूर्णोपि गृह्णाति २६
तत्रापि निःकामाः कृतार्थाः इत्याह सत्यमिति प्रार्थितः सन्नर्थितं ददातीति सत्यं अर्थापि परमार्थो।

दो न भवत्येव यतस्तस्मात् यतः दत्तादनंतरं न न्वनार्थितः चेत् किमपि न दद्यादि
त्यापाकाह अनिच्छतो निःकामानां इच्छापिधानमाच्छादकं सर्वकाम
परिपूर्णकं निजपादपल्लवं स्वयमेव संपादयति २७

भा॰
पं॰
६६

सिद्धस्य मन्वकृयातानस्य स्ट्रुकस्य प्रवचनस्य कृतस्यान्यस्यापि कर्मणः स्वर्गो सत्वाद्युपभुक्ताद्वशेषि
तेषां हि किंचिदस्ति तेनाजनाभे वर्षे स्माकं जन्म स्मानकोऽहणोस्तु तिमनहरिरेव सेव्यस्त्यनसंधानफ
लं यतो हरिर्भजतां श्रेयः स्वयं तनोति २८ स्वेष्टो २९ ५-१ भा यं पि यो च ए न ए॥ १९
विशेषस्तत्त्वादिषु द्वीपस्थितिमाह सहार्णवैः लोकालोकस्थितिं चानते वहिर्भागादिमानतः ता
यत्र तः स्वर्गसावावशेषितं सिद्धस्य स्ट्रुकस्य कृतस्य शोभने तेनाजनाभे स्मृतिमन्नस्मनः
स्माद्वर्षे हरिर्यद्भजतां श्रेयस्तनोति २८ श्रु ३- जंबुद्वीपस्याजंस्वउपद्वीपानष्टौ हैकउपदि
शंति सगरात्मजैरश्वान्वेषणाय इमां महीं परितो निखनद्भिरुपकल्पितान् २९ तद्यथा।
एवं भावस्वर्गोपवर्गकलश्रावतं नारमणको मोदर हरिणः पांचजन्यः सिंहलो लंकेति एवं तव
भारतोत्तमजंबूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ५-१ श्री ग ते चमे
को विशेषः श्रु ३- अतः परं सत्त्वादीनां प्रमाणलक्षणसंस्थानतो वर्षविभागउ
पवर्ण्यते १ जंबूद्वीपोयं यावत्प्रमाणविस्तारस्तावतालारोदधिना परिवेष्टितो यथा मेरु
जंबाख्येन लवणोदधिः रथिनतो द्विगुणविशालेन सत्त्वाख्येन परिक्षिप्तः यथा परिखा बा
ह्योपवनेन सतो जंबुप्रमाणो द्वीपाख्याकरो हिरण्मयउत्थितो यत्राग्निरुपास्ते सप्तजिह्व
स्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आ
त्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम २ शिवं वयवयसं सुभद्रं शांतं क्षेमममृतमभयमस्तु
वनाल नविस्तारेणावरितिप्तः परितित्तः परिवेष्टितः उपास्ते तिष्ठते आकलय्य समर्प्य २ अभि
ताला प्रसिद्धाः सप्त वस्त्रन्येव चपवेनानषय श्रसहस्रवाः सत्नीस्वर्थः मामसोत रस्य मेरुलाकार तो
केरे तेलला द्विप चद्वीपेश्रवर्षोदूयः तिर्यग्रवोकारा उभयतो विस्तृताः इतिनामा ते अन्यत्रसमा

९९

जलोपस्पर्शनेनविधूतेरजःतमः तमस्त्रयेषांहंसादयोब्राह्मणादिस्थानीयाः विबुधोपमसंदर्शनेनज्ञमसेदा
दिरहितंरूपंप्रजननमपत्योत्पादनंचयेषां ४ विशिनष्टिपिद्वीपमंत्रामान्नायेयजंते ५ प्रत्नस्यपुराणपु
रुषस्यविस्नोर्यद्रूपंतत्सूर्यमीमहिप्रार्थयामहेकथंभूतंसत्यादीनामात्मानंअधिष्ठातारंतत्रसत्यमनृतो

मणिकूटोवज्रकूटइंद्रसेनोज्योतिष्मान्सुपर्णोहिरण्यष्ठीवोमेघमालइतिसेतुशैलाः अरुणानृ २
म्णांगिरसीसावित्रीसुप्तभातानृतंभरासत्यंभरेतिमहानद्यः यासांजलोपस्पर्शनविधूतरजस्त
मसोहंसपतंगोर्ध्वायनसत्यांगसंज्ञाः चत्वारोवर्णाः सहस्रायुषोविबुधोपमसंदर्शनप्रजननाः
स्वर्गद्वारंत्रय्याविद्ययाभगवंतंत्रयीमयंसूर्यमात्मानंयजंते ४ प्रत्नस्यविस्नोरूपंयत्सत्यस्यर्तस्यब्र
ह्मणः अमृतस्यचमृत्योश्चसूर्यमात्मानमीमहीति ५ प्लक्षादिषुपंचसुपुरुषाणामायुरिंद्रि
यमोजःसहोबलंबुद्धिर्विक्रमइतिचसर्वेषामौत्पत्तिकीसिद्धिरविशेषेणवर्तते ६ प्लक्षःस्वस
मानेनेक्षुरसोदेनावृतोयथातथाद्वीपोपिशाल्मलोद्विगुणविशालः समानेनसुरोदेनावृतः
परिवृंक्तेयत्रहवैशाल्मलीप्लक्षायामा ७ यस्यांवावकिलनिलयमाहुर्भगवतःछंदःस्तु
तःपतत्त्रिराजस्यसाद्वीपहूतयेउपलक्ष्यते ८ तद्द्वीपाधिपतिःप्रियव्रतात्मजोयज्ञबाहुःस्व
सुतेभ्यःसप्तभ्यःतन्नामानिसप्तवर्षाणिव्यभजत् सुरोचनंसौमनस्यंरमणकंदेववर्हंपारिभद्र
भ

यमानोधर्मः ऋतंप्रमीयमानोधर्मः ब्रह्मणः तद्वोपकस्यवेदस्यअमृतस्यअमलतराणस्मृत्योरञ
मलतराणस्य छंदोभिस्तावयवभूतैः श्रीविस्नुस्तौतीतिछंदःस्तुतः तस्यद्वीपस्यहूतयेआपदेशा
यस्यपर्णोपिगरुत्मोस्मिन्हूतेशिरस्थ्याटिष्फतेः ६

भौ· पं· ६२

स्तोभिः स्वरश्मिभिः श्रेष्ठः सर्वं सोमो नो राजा स्वाल्याभिसद्ध्योन भवन्तु स्वपाठेन विवस्वयासंस्थ
भावः १२ एवं सुरोदाद्बहिस्तद्द्विगुणेनावृतः कुशद्वीपस्त्वनयः स्वशाख्याशिस्वकोमलेशिखाः तेषां

तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिजाताः सरसः शान्तश्रेणी वामदेवः जंटः कुमुदः पुष्पवर्षः सहा
स्रक्तिरिति अनुमती सिनीवाली सरस्वती कुहूः जनीनन्दा राकेति ९ तद्वर्षपुरुषाः अग्नि
परवीरधीरवसंप्रपरेसपरसंज्ञाः भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते १० स्तोभिः
पितृदेवेभ्यो विभजन् कृष्णशुक्लाभ्यां प्रजानां सर्वासां राजान्धः सोमो नः अस्त्विति ११ एवं
८ सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथापूर्वः कुशद्वीपः यस्मिन् कुशस्तंबो देव
कृतस्तद्द्वीपाख्यायनो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति १२ तद्द्वीपपतिः
प्रैयव्रतो राजन् हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वसुतेभ्यः यथाभागं विभज्य स्वयं तप
आतिष्ठत वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तनामदेवनामभ्यः १४ तेषां व
र्षेषु सीमागिरयो नद्यश्चाभिजाताः सप्तैव बभ्रुः चतुःशृङ्गः कपिलः चित्रकूटो देवानीक ऊ
र्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमा
लेति १५ यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञाः भगवन्तं
जातवेदसरूपिणं कर्मकौशलेन यजन्ते १६ परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवा

ट्रोचिषा १२ हे जातवेदः त्वं साक्षात्परस्य ब्रह्मणो हरेः हव्यवाडसि अतो देवानां यज्ञेन पुरुषं हरि
मेव यजेऽङ्गानां नाम स्वादनं मे गिने समर्थये इत्यर्थः १७ ॥ ॥ ६२

उपक्लृप्तः चेष्टितः यथा कुशद्वीपो घृतोदेन वृतः १८ गुहस्य कार्तिकेयस्य प्रहरणेनास्त्रेणोन्मथि
तानि नितम्बाः कुञ्जानि च यस्य स्वयं भगवान् वरुणेनाभिगुप्तः आपोमयं अम्मयं २२ हे आपः पुरुषात्परमात्मनो लब्ध

तथा बहिः क्रौञ्चद्वीपो द्विगुणः समानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतो
देन यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते १८ योऽसौ गुहप्रहरणोन्मथित
नितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव १९ तस्मिन्नपि
प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान्
वर्षपान्निवेश्य स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दम्
उपजगाम २० आमो मधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठ
सुताः तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्धमानो भोजन उपबर्हिणो न
न्दो नन्दनः सर्वतोभद्र इति २१ अभया अमृतौघा आर्यका तीर्थवती रूपवती पवित्रवती शु
क्लेति यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा आपो
मयं देवमपां पूर्णेनाञ्जलिना यजन्ते २२ आपः पुरुषवीर्याः स्थ पुनन्तीर्भूर्भुवः सुवः ता नः पु
नीतामीवघ्नीः स्पृशतामात्मना भुव इति २३ एवं पुरस्तात्क्षीरोदात्परित उपवेशितः शाक
द्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परीतो यस्मिन् शाको नाम मही

सामर्थ्याः स्थ भवथ अतएव त्रैलोक्यं पुनन्त्यः ता भवन्त्यः नः अस्माकं स्पृशत अङ्गं शरीराणि पुनन्तु ।
यतः आत्मना स्वरूपेणैवामीवघ्नीः पापहन्त्र्यः यस्य पर्णान्येतः स्वरस्पर्शानि वहति स्वदुस्पर्शानि सत्या

२४

आत्मकेतुभिःप्राणादिवृत्तिभिः २९ ज्वलनशिखावदमलानांकमलपत्राणामयुतानामयुता

तस्यापिप्रैयव्रतएवाधिपतिर्नाम्नामेधातिथिःसोपिविभज्यसप्तवर्षाणिपुत्रनामानितेषुस्वा
त्मजान्पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिप
तीन्स्वयंभगवत्यनंतआवेशितमतिस्तपोवनंप्रविवेश २५ एतेषांवर्षमर्यादागिरयोनद्य
श्चसप्तसप्तैवईशानउरुशृंगोबलभद्रःशतकेसरःसहस्रस्रोतोदेवपालोमहानसइति २६ अ
नघायुर्दाउभयस्पृष्टिरपराजितापंचपदीसहस्रस्रुतिर्निजधृतिरिति २७ तद्वर्षपुरु
षाऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानोभगवंतंवाय्वात्मकंप्राणायामविधूतरजस्त
मसःपरमसमाधिनायजंते २८ अंतःप्रविश्यभूतानियोबिभर्त्यात्मकेतुभिः अंतर्या
मीश्वरःसाक्षात्पातुनोयद्वशेस्फुटमिति २९ एवमेवदधिमंडोदात्परतःपुष्करद्वीपस्ततो
द्विगुणायामःसमंततउपकल्पितःसमानेनस्वादूदकेनसमुद्रेणबहिरावृतः यस्मिन्ब
बृहत्पुष्करंज्वलनशिखामलकनककल्पितःसमानेनस्वादूदकेनसमुद्रेणबहिरावृतः
यस्मिन्बृहत्पुष्करंज्वलनशिखामलकनकपत्रायुतायुतंभगवतःकमलासनस्याध्या
सनंपरिकल्पितंतद्द्वीपमध्येमानसोत्तरनामाएकएवार्वाचीनपराचीनवर्षयोर्मर्यादाचलो
युतयोजनोच्छ्रायायामोयत्रतुचतसृषुदिक्षुचत्वारिपुराणिलोकपालानामिंद्रादीनांयदु
परिष्टात्सूर्यरथस्यमेरुंपरिभ्रमतःसंवत्सरात्मकंचक्रंदेवानामहोरात्राभ्यांपरिभ्रमति ३० त

नामयुतानियस्यतत् देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यामित्यर्थः ३० ॥

ब्रह्मरूपिणां कमलासनाम्तिं सकर्मकेन ब्रह्मसालोक्यादिसाधकेन १२ कर्ममयं कर्मफलरूपं ब्रह्मा
लिंगनं यस्मात् एकस्मिन्नेव परमेश्वरे अनोति ज्ञापयतं अत एव ब्रह्मतनोर्हेतेः १३ ततः अहोरात्रस्य स्था
लोकाः सूर्याख्य लोकव्यादेशः अलोकस्तद्रहितः तयोरंतराले मध्येन यो विभागार्थे स्थित इत्यर्थः १४ त
तः पुरस्ताद्दिग्विजेतदेव कियतान्तरे ऽन्यपेलायातनदनवंतिनीम् भूमिमाह यावन्मानसोत्तरमेर्वोरंतरं
सार्धसप्तदशोत्तरसार्धकोटिपरिमितं तावतीं भूः अहोरात्रं तो स्थितं तत्र च प्राणिनो यि संति ततः का
नदूर्धं पुरुषा भगवंतं ब्रह्मरूपिणां सकर्मकेन कर्मणा रापयंतिष्टं चोदाहरंति १२ यत्तत्कर्ममयं
लिंगं ब्रह्मलिंगं जनो ऽर्चयेत् एकांतमद्वयं शांतं तस्मै भगवते नमः १३ अ ह च ततः पुर
स्ताल्लोकालोकनामाचलो लोकालोकयोरंतराले परितउपक्षिप्तः यावन्मानसोत्तरमेर्वोरंत
रं तावती भूमिः कांचन्यन्यादर्शतलोपमा यस्यां प्रहितः पदार्थो न कथंचित्पुनः प्रत्युपलभ
तेतस्मात्सर्वसत्वपरिहृतासीत् १५ लोकालोक इति समाख्या यदनेनाचलेन लोकालोका
स्यांतर्वर्तिनावस्थाप्यते १६ स लोकत्रयांते परितः ईश्वरेण विहितो यस्मात्सूर्यादीनां ध्रुवाप
वर्गाणां ज्योतिर्गणानां गभस्तयो ऽर्वाचीनांस्त्रीन् लोकानाविततन्वाना न कदाचित्पराचीना भवितु
मुत्सहंते तावदुन्नहनायामः १७ एतावान् लोकविन्यासो मानलक्षणसंस्थाभिर्विचिंतितः क
विभिः स तु पंचाशत्कोटिगणितस्य भूगोलस्य तुरीयभागो ऽयं लोकालोकाचलः सार्धद्वाद
चनीभूमिरस्यास्तीत्यर्थः साचैकोनचत्वारिंशल्लक्षोत्तरकोटिषट्कपरिमिता तेयाण एवं हि सति समेरु
लोकालोकयोरंतरं सार्धद्वादशकोटिपरिमितं वल्यमानाममुपपन्नं भवति एतदेव शेव तत्रेषु ना को
टिद्वयं त्रिपंचाशल्लक्षाणि च ततः परं पंचाशत्सहस्राणि समद्वीपाः समागराः ततो हेममयी भूमि
र्द्वाकोटयोवशाननेदेवानां क्रीडनार्थाय लोकालोकस्ततः परमिति अत्र च दशकोटितत्पर्यंतं

भा॰ पं॰ ५५

लोकत्रयस्यांते परितो मर्यादारूपो विहितः यस्मात्प्रतिबंधकात् सूर्य आदिर्येषां ध्रुवोपवर्गांतो ये
षां आवितन्वानाः समंतात्प्रकाशयंतः परतो भवितुं न शक्नुवंति तावदुन्नहनमस्येत्यर्थः तदनुरूपा।
आयाम अस्य विस्तारो यस्माद्ध्रुवात्प्रच्छिन्नतया त्रिलोकीमर्यादाभूत इत्यर्थः ३७ सोयं तु लोका।
लोकाचलः तुरीयभागः चतुर्थांशः सार्धद्वादशकोट्यो मेरोरेकतः तिष्ठतीत्यर्थः ३८ आशासु दि
क्षु ये निवेशिताः ते आसते ३९ तेषां दिग्गजानां स्वविभूतीनां महीदृष्टीनां च विविधवीर्या।

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाधिनिवेशिता ये द्विरदपतय ऋ
षभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ३९ तेषां स्वविभूती
नां लोकपालानां विविधवीर्योपबृंहणाय भगवान्परममहापुरुषो महाविभूतिपतिः।
अंतर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेना
दिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैः भुजदंडैः संधारयमाणः
तस्मिन्गिरिवरे समंतात्सकललोकस्वस्तय आस्ते ४० आकल्पमेवं वेषं गतो भगवान्।
एष आत्मयोगमायाविरचितविविधलोकयात्रागोपीथायेत्यर्थः ४१ उपबृंहणाय सकललो
कस्वस्तये भगवांस्तस्मिन्गिरावास्ते किं कुर्वन् आत्मनः स्वस्य यद्विशुद्धसत्त्वं तत्संधारयमाणः
विष्वक्सेनकीर्तिरूपं धर्मज्ञानादीन्यष्टौ महासिद्धयश्चोपलक्षणं यस्य तत् दोर्दंडैरुपलक्षितः सन्
ततमहाविभूतेः परमैश्वर्यस्य पतिः तादृक एवमस्यास्मिन्नास्ते ४० तत्रैतर्यामितोऽतः स्थ।
नैव सर्वैकर्तृत्वं पाकं किं तस्य बहिः समंतात् दृश्याने ते त्याग कातस्यार्थे स्वयमेव व्याचष्टे आत्म
नो योगमायया विरचिता विविधलोकयात्रा तस्या गोपीथाय रक्षणाय एष भगवान् एवं भूतमा

५५ [illegible]

